| नरककुण्डनामानि | | पापभेदात् कुण्डविशेषगामिनः | |
|---|---|---|---|
| पूयकुण्डम् | ३० | शूद्रयाजी तत्श्राद्धभुक् तच्छवदाही च ब्राह्मणः | ३० |
| सर्पकुण्डम् | ३१ | श्रीकृष्णपदचिह्नमस्तकस्य सर्पस्य हन्ता | ३१ |
| मशकुण्डम् | ३२ | विधिं दत्त्वा क्षुद्रजन्तुहन्ता | ३२ |
| दंशकुण्डम् | ३३ | विधिं दत्त्वा जीवहन्ता | ३३ |
| गरलकुण्डम् | ३४ | मक्षिकां हत्वा मधुग्राही | ३४ |
| वज्रदंष्ट्रकुण्डम् | ३५ | अदण्डविप्रयोर्दण्डकृत् | ३५ |
| वृश्चिककुण्डम् | ३६ | अर्थलोभात् प्रजादण्डकृत् | ३५ |
| शरकुण्डम् | ३७ | शस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः | ३७ |
| शूलकुण्डम् | ३८ | | ३८ |
| खड्गकुण्डम् | ३९ | | ३९ |
| गोलकुण्डम् | ४० | अल्पदोषेण कारायां प्रजाबन्धनकृत् | ४० |
| नक्रकुण्डम् | ४१ | जलादुत्थितनक्रादि हन्ता | ४१ |
| काककुण्डम् | ४२ | कामेन परस्त्रीवक्षःश्रोण्यास्यद्रष्टा | ४२ |
| सञ्चानकुण्डम् | ४३ | स्वर्णचौरः | ४३ |
| वाजकुण्डम् | ४४ | ताम्रलौहचौरः | ४४ |
| वज्रकुण्डम् | ४५ | देव-देवद्रव्ययोश्चौरः | ४५ |
| तप्तपाषाणकुण्डम् | ४६ | देव-द्विजयो रौप्य-गो-वस्त्राणां चौरः | ४६ |
| तीक्ष्णपाषाणकुण्डम् | ४७ | देव-द्विजयोः पित्तल-कांस्यपात्रचौरः | ४७ |
| लालाकुण्डम् | ४८ | वेश्यान्नभुक् तद्वृत्तिजीवी च | ४८ |
| मसीकुण्डम् | ४९ | म्लेच्छसेवी मसीजीवी च ब्राह्मणः | ४९ |
| चूर्णकुण्डम् | ५० | देव-द्विजयोः शस्यताम्बूलासनचौरः | ५० |
| चक्रकुण्डम् | ५१ | विप्रद्रव्यं हृत्वा चक्रकारी | ५१ |
| वक्रकुण्डम् | ५२ | विप्र-बान्धवयोर्वक्रताकारी | ५२ |
| कूर्म्मकुण्डम् | ५३ | हरिशयने कूर्म्ममांसभुक् ब्राह्मणः | ५३ |
| ज्वालाकुण्डम् | ५४ | देवद्विजयोर्घृततैलादिहृत् | ५४ |
| भस्मकुण्डम् | ५५ | | ५५ |
| दग्धकुण्डम् | ५६ | देवद्विजयोर्द्धात्रीगन्धतैलद्रव्याणामपहर्त्ता | ५६ |
| तप्तसूर्म्मीकुण्डम् | ५७ | बलखलत्वादिना परभूमिहरः | ५७ |
| असिपत्रकुण्डम् | ५८ | अर्थलोभात् खड्गेन जीविच्छेदी नरघाती च | ५८ |
| क्षुरधारकुण्डम् | ५९ | ग्रामनगरादिदाहकृत् | ५९ |
| सूचीमुखकुण्डम् | ६० | परकर्णे मुखं दत्त्वा परनिन्दकः परदोषश्लाघी वेदब्राह्मणनिन्दकश्च | ६० |
| गोधामुखकुण्डम् | ६१ | गृहं भित्त्वा वस्तुगोच्छागमेषचौरः | ६१ |
| नक्रमुखकुण्डम् | ६२ | सामान्यद्रव्यचौरः | ६२ |
| गजदंशकुण्डम् | ६३ | गजतुरगनरचौरः | ६३ |
| गोमुखकुण्डम् | ६४ | जलपिवन्तीवारकः | ६४ |
| कुम्भीपाककुण्डम् | ६५ | गो-स्त्री-भिक्षु-भ्रूण-ब्रह्महा अगम्यागामी दीक्षासन्ध्याहीनस्तीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारो वृषलीपतिश्च | ६५ |
| कालसूत्रकुण्डम् | ६६ | वेश्यान्नभुक् तत्संसर्गी च | ६६ |
| अवटोदकुण्डम् | ६७ | कुलटादिषड्वेश्यागामी द्विजः | ६७ |
| अरुन्तुदकुण्डम् | ६८ | चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी | ६८ |
| पांशुभोजकुण्डम् | ६९ | एकस्मै वाक्प्रदत्तकन्याया अन्यस्मै दाता | ६९ |
| पाशवेष्टकुण्डम् | ७० | दत्तापहारी | ७० |
| शूलप्रोतकुण्डम् | ७१ | अभक्त्या शिवलिङ्गपूजकः | ७१ |
| प्रकम्पनकुण्डम् | ७२ | विप्रदण्डकृत् तत्कम्पकृद्भयदायी च | ७२ |
| उल्कामुखकुण्डम् | ७३ | सकोपवदना स्वामिनि कटुवादिनी | ७३ |
| अन्धकूपकुण्डम् | ७४ | शूद्रभोग्या ब्राह्मणी | ७४ |
| वेधनकुण्डम् | ७५ | वेश्या । सा च पञ्चषट्पुंगमनाद्भवति | ७५ |
| दण्डताड़नकुण्डम् | ७६ | युङ्गी । सा च सप्ताष्टपुंगमनाद्भवति | ७६ |
| जालबद्धकुण्डम् | ७७ | महावेश्या । साचाष्टाधिकपुंगमनाद्भवति | ७७ |
| देहचूर्णकुण्डम् | ७८ | कुलटा । सा च पुंद्वयगमनाद्भवति | ७८ |
| दलनकुण्डम् | ७९ | स्वैरिणी । वृषली । सा चतुःपुंगमनाद्भवति | ७९ |
| शोषणकुण्डम् | ८० | धृष्टा । पुंश्चली । सा च त्रिपुंगमनाद्भवति | ८० |
| कषकुण्डम् | ८१ | सवर्णपरदारी | ८१ |
| शूर्पकुण्डम् | ८२ | ब्राह्मणीगामी क्षत्त्रियो वैश्यश्च | ८२ |
| ज्वालामुखकुण्डम् | ८३ | करे तुलसीगङ्गाजलदेवशिलाश्च कृत्वा प्रतिज्ञाकृत्तदपालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च | ८३ |
| जिह्मकुण्डम् | ८४ | नित्यक्रियाहीनो देववागनास्तिको मन्त्रोपहासी च | ८४ |
| धूमान्धकुण्डम् | ८५ | देवविप्रयोर्धनहारी | ८५ |
| नागवेष्टनकुण्डम् | ८६ | वैद्यदेवशवृत्तिकारी लाक्षालोहव्यापारी रसादिविक्रयी च ब्राह्मणः | ८६ |

**नरकजित्**, पुं, (नरकं तन्नाम्ना विख्यातमसुरं जयतीति । जि + क्विप् । तुक् च ।) विष्णुः । इति त्रिकाण्डशेषः ॥

**नरकदेवता**, स्त्री, (नरकस्य अधिष्ठात्री देवता ।) निरयदेवी । तत्पर्य्यायः । अलक्ष्मीः २ निरृतिः ३ कालपर्णी ४ । इति शब्दरत्नावली ॥

**नरकमुक्तः**, त्रि, (नरकात् मुक्तः ।) नरकागतः । यथा,—

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते ।
पतितात् प्रतिगृह्याथ खरयोनिं व्रजेद्बुधः ॥
नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकी ।
उपाध्यायं व्यलीकन्तु कृत्वा श्वा भवति द्विजः ॥
तज्जायां मनसा वाञ्छंस्तद्द्रव्यं वाप्यसंशयम् ।
गर्द्दभो जायते जन्तुर्म्मित्रस्यैवापमानकृत् ॥
शत्रोरितरमाक्रुश्य शारिका संप्रजायते ।
पितरौ पीड़यित्वा तु कच्छपत्वञ्च जायते ॥
भर्त्तुः पिण्डमपाश्नन्तो हित्वान्यानि च सेवयेत् ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः ।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते ।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः ॥
परदाराभिमर्षात्तु वृको घोरोऽभिजायते ।
भ्रातृभार्य्याप्रसङ्गत्वे कोकिलो जायते नरः ॥
गुर्व्वादिभार्य्यागमनाच्छूकरो जायते नरः ।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
देवतापितृविप्राणामदत्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकाद्वापि वायसः स प्रजायते ॥
ज्येष्ठभ्रात्रवमानाच्च क्रौञ्चयोनौ प्रजायते ।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ॥
अशस्त्रं पुरुषं हत्वा नरः संजायते खरः ।
कृमिः स्त्रीवधकर्त्ता च बालहन्तावजायते ॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
हृत्वान्नञ्चैव मार्ज्जारस्तिलञ्चैव मूषिकः ॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः ॥
अपो हृत्वा तु पापात्मा वायसः संप्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता वकस्तथा ॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते ।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ॥
छुच्छुन्दरिः शुभान् गन्धान् वंशं हृत्वा शशो भवेत् ।
षण्डः कलापहरणे काष्ठहृत् काष्ठकीटकः ॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यैवापहृन्नरः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥